Shodhshauryam, International Scientific Refereed Research Journal
Available online at : www.shisrrj.com
© 2024 SHISRRJ | Volume 7 | Issue 1
OPEN ACCESS
ISSN : 2581-6306
doi : https://doi.org/10.32628/SHISRRJ

# संस्कृतगद्यसाहित्ये अद्भुतकथानां तत्सम्बद्धसाहित्यानां विमर्शः

प्रदीपकुमारपाण्डेयः
शोधच्छात्रः, केन्द्रीयसंस्कृतविश्वविद्यालयः, जयपुरपरिसरः, जयपुरम्

**Article Info**

**Publication Issue :**
January-February-2024
Volume 7, Issue 1
**Page Number :** 160-164
**Article History**
Received : 01 Feb 2024
Published : 15 Feb 2024

**शोधसारांशः**- अद्भुतकथानां स्थानमत्यन्तं महत्वपूर्णमस्तीति सर्वे सहृदयाः मुक्तकण्ठेन स्वीकुर्वन्ति। यानि अद्भुतकथासाहित्यानि सन्ति, तेषु साहित्येषु वेतालपञ्चविंशतिका, सिंहासनद्वात्रिंशिका तथा च शुकसप्ततिः इति साहित्यत्रयं लोकेषु बहुधा प्रचलितम् अस्ति।

**मुख्यशब्दाः** – संस्कृतभाषा, वैदिकसाहित्यम्, संस्कृतेतिहासः, संस्कृतवाङ्गमयम्, भारतीयसंस्कृतिः, मानवमूल्यानि, साहित्यविधाः, गद्यसाहित्यम्, सरलसंस्कृतकथा, अद्भुतकथा, कथातत्त्वानि, शैक्षिकतत्त्वानि, कथागतमूल्यानि, शैक्षिकविमर्शः।

**संस्कृतं** हि विश्वस्य प्राचीनतमा भाषा, अस्यां भाषायां निबद्धं साहित्यं विश्वस्य प्राचीनतमं साहित्यम् इति। भारतवर्षस्य समस्तमपि प्राचीनं वाङ्मयं संस्कृतभाषामाश्रित्यैवातिष्ठते।

**"संस्कृतं हि दैवी वागन्वाख्याता महर्षिभिः।**
**भाषासु मधुरा मुख्या दिव्या गीर्वाणभारती॥"**[1]

निखिलमपि वैदिकवाङ्मयं, रामायणं, महाभारतं, पुराणानि, स्मृतिग्रन्थाः, दर्शनानि, धर्मग्रन्थाः, महाकाव्यानि, काव्यानि, नाटकानि, गद्यकाव्यानि, गीतिकाव्यानि, आख्यानसाहित्यं, नीतिग्रन्थादयश्च संस्कृतभाषायाम् एव उपलभ्यन्ते। न केवलमेतदेव अपितु व्याकरणं, काव्यशास्त्रं, गणितं, ज्योतिषम्, आचारशास्त्रम्, आयुर्वेदः, धनुर्वेदः, छन्दश्शास्त्रं, कोशग्रन्थाश्च संस्कृतभाषायाः गौरवं वर्धयन्ति। वेदे यः प्राचीनार्यजातीनां सभ्यता, संस्कृतिः, धर्मः, राजनीतिः, इतिहासश्च ज्ञायते। पुराणेषु, उपनिषत्सु, रामायणे, महाभारते, महाकाव्येषु, बौद्धानां त्रिपिटकसाहित्ये, जैनानामार्षसाहित्ये च भारतस्य प्राचीनेतिहासः विद्यते। कौटिल्यस्य अर्थशास्त्रे, मनुस्मृतौ, याज्ञवल्क्यस्मृतौ च तात्कालिकसमाजस्य इतिहासः उपलभ्यते।

संस्कृतवाङ्मये संस्कृतसाहित्यस्य भागद्वयमुपलभ्यते वैदिकं लौकिकं च। वैदिकसंस्कृतस्य स्वरूपं वेदेषु तस्मिन् काले रचितेषु अन्येषु ग्रन्थेषु चोपलभ्यते। लौकिकसंस्कृतं प्रायः पाणिनीयव्याकरणनियमानुसारं भवति। संस्कृते साहित्यपदेन व्यापकार्थे संस्कृतभाषायां निबद्धं निखिलं वाङ्मयं, सङ्कुचितार्थे च काव्य-नाटक-तत्स्वरूपप्रतिपादकशास्त्राण्येव अभिधीयन्ते। संस्कृतसाहित्यस्य उत्कृष्टरचनाः विश्वविख्याताः सन्ति। अस्माकं सभ्यता संस्कृतिश्च वेदेभ्यः, स्मृतिभ्यः, पुराणेभ्यः निःसृता।

**Copyright © 2024 The Author(s):** This is an open-access article distributed under the terms of the Creative Commons Attribution **4.0 International License (CC BY-NC 4.0)** which permits unrestricted use, distribution, and reproduction in any medium for non-commercial use provided the original author and source are credited.

उच्चदार्शनिकविचाराः, आध्यात्मिकज्ञानं, नैतिकताचैतत् सर्वं संस्कृतसाहित्ये समाविष्टमस्ति। अतः स्पष्टं भवति यत् भारतीयसंस्कृतिः संस्कृतसाहित्ये सुरक्षिता अस्ति।

मानवानां स्वाभाविकी या भाषा भवति, तस्या भाषायाः स्वरूपं गद्यात्मकं भवतीति सर्वे मुक्तकण्ठेन स्वीकुर्वन्ति। संस्कृतभाषायां गद्यसाहित्यस्य विशिष्टं स्थानं वर्तते। वस्तुतस्तु गद्ये छन्दोगान-मात्रादीनां गणना न भवति। **"गद्" व्यक्तायां वाचि** इत्यस्माद्धातोः **"यत्" प्रत्यये** कृते सति प्रातिपदिकत्वात् गद्यमिति शब्दविशेषः निष्पद्यते। यस्यार्थोऽस्ति मानवस्य अभिव्यक्तेः मूलाप्रक्रिया। बहुकालं यावत् गद्यं सामान्यमेव आसीत्। कालक्रमेण अस्य गद्यस्य विकासः प्रक्रियायाम् अलङ्कार-रस-भावादीनां संयोगं कृत्वा अस्य स्वरूपं कविभिः चमत्कृतम्। चमत्कृतं गद्यं सामान्यगद्यं न भूत्वा गद्यकाव्यम् अभवत्। महाकविना दण्डिना स्वस्य काव्यादर्शे गद्यकाव्यस्य निर्वचनं प्रदाय आख्यायिका-कथयोः इति उभयरूपेण द्विधा विभक्तम्। तद्यथा- **"अपादः पदसन्तानो गद्यमाख्यायिका कथा"**।[2] **"देवाः पशुपक्षीमनुष्येभ्योः वाचं दद्युः"**[3] इति अथर्ववेदस्य उक्तिं दृष्ट्वा देवाः एव देवीवाचम् असृजन्। वैदिकसंहितासु सर्वप्रथमं गद्यस्य एव दर्शनं भवति। वस्तुतस्तु यजुर्वेदे तत्र कृष्णयजुर्वेदस्य तैतरीयसंहितायाम् अस्य प्राचीनतमं रूपं सम्प्राप्यते। तद्यथा **"अनियताक्षरावसानं यजुः"** अस्यैव वेदस्य काष्ठकमैत्रायणी इत्युभयोः संहितयोर्मध्ये अपि गद्यस्य सत्ता विद्यमाना वर्तते। अथर्ववेदेन सह ब्राह्मणादिषु ग्रन्थेषु अपि प्राचुर्येण गद्यं प्राप्यते। समास-अलङ्कार-रसादीनाञ्च विशेषप्रभावकारणात् अष्टशताब्द्याम् एका उक्तिः प्रचलिता अभवत् यत् **"गद्यं कवीनां निकषं वदन्ति"**। साहित्यदर्पणे आचार्येण विश्वनाथेन गद्यस्य निर्वचनप्रसङ्गे निगदितं यत्

**"वृत्तगन्धोज्झितं गद्यं मुक्तकं वृत्तगन्धि च।**
**भवेदुत्कलिकाप्रायं चूर्णकं च चतुर्विधम्।। "**[4]

एतानि चतुर्विधानि तत्र वृत्त-गन्धि-चूर्णम्-उत्कलिकाप्रायं मुक्तकानि च गद्यानि भवन्ति। छन्दोबद्धसमन्वितं गद्यं वृत्तगन्धिगद्यमुच्यते। एतादृशे गद्ये छन्दसोऽपि अंशानां समन्वयनं गद्यांशे भवति। "अनाविद्धंललितपद्यं अर्थात् यस्मिन् गद्ये ललितपद्यैः सह अदीर्घसमसनानि भवन्ति तादृशं चूर्णं गद्यमुच्यते। यस्मिन् गद्ये दीर्घ समस्तानि उद्धतानि पदानि च भवन्ति तादृशं गद्यम् उत्कलिकाप्रायं गद्यमुच्यते। मुक्तकं नाम समासरहितं गद्यमुच्यते। यथा आचार्येण विश्वनाथेन साहित्यदर्पणे विषयेऽस्मिन् निगदितं यत्

**"आद्यं समासरहितं वृतभागयुतं परं।**
**अन्यद्दीर्घसमासाख्यं तुर्यं चाल्पसमासकम्।।**[5]

गद्यकाव्यस्य भेदद्वयम्। तत्र कथा-आख्यायिका च भवति। इत्युभयोः भेदयोः निरूपणम् अग्निपुराणे, काव्यादर्शे, कव्यालङ्कारे, साहित्यदर्पणादिषु ग्रन्थेषु प्राप्यते। अमरकोशे अपि उभयोः भेदयोः निरूपणं सनिर्वचनेन कृतमस्ति। यथा

**"आख्यायिकोपलब्धार्था प्रबन्धकल्पना कथा"**[6]

वस्तुतस्तु ऐतिहासिकेषु विषयेषु यद् गद्यं कविभि: विलिख्यते सा आख्यायिका एवञ्च मौलिककल्पनाधारिते विषये विलिखितं गद्यं कथा उच्यते।

**अद्भुतकथासाहित्यम्-** लोकसाहित्येषु अद्भुतकथानां स्थानम् अत्यन्तं महत्वपूर्णम् अस्तीति सर्वे सहृदया मुक्तकण्ठेन स्वीकुर्वन्ति। यानि अद्भुतकथासाहित्यानि सन्ति, तेषु साहित्येषु वेतालपञ्चविंशतिका, सिंहासनद्वात्रिंशिका तथा च शुकसप्तति: इति साहित्यत्रयं लोकेषु बहुधा प्रचलितम् अस्ति। तेषाम् अद्भुतकथा- सम्बद्धसाहित्यानां विमर्श: अत्र प्रस्तुयते।

**वेतालपञ्चविंशति**:- अस्य कथासाहित्यस्य रचनाकार: बेतालभट्टराव: अस्ति। एष: राजाविक्रमस्य नवरत्नेषु एक: रत्न: आसीत्। कथासाहित्येऽस्मिन् या: कथा: वर्णिता: सन्ति, ता: सर्वा: कथा: राज्ञ: विक्रमस्य न्यायशक्तिं बोधयन्ति। बेताल: प्रतिदिनं राजानम् एकां कथां श्रावयति। कथाया: अन्ते: राजानं प्रति एकं प्रश्नं करोति, यस्य उत्तरं नूनमेव दात्तव्यम् भवति। यदि राजा उत्तरं न दास्यति तर्हि स: बेताल: रुष्टो भूत्वा वृक्षारूढो भविष्यति। एतदर्थं यदा राजानं प्रति तस्य बेतालस्य प्रश्न: भवति स्म, तदा राजा तुष्णीं न भूत्वा उत्तरम् अन्वेषयति।

मुख्यकथायां राजाविक्रम: एकस्य तान्त्रिकस्य सिद्धे: सहयोगार्थं एकस्मिन् वृक्षे दोलायमानं शवं स्वस्कन्धे स्थाप्य सहैव शमशानगमनस्य वार्तां स्वीकरोति। तस्मिन् खलु शवे बेतालस्य वासं भवति। मार्गे स: बेताल: राजानं कामपि कथां श्रावयति स्म, कथानन्तरे प्रश्नं करोति, मौने सति स: वृक्षारुढो भवति। अनेन प्रकारेण साहित्येस्मिन् चतुर्विंशति: कथा: सन्ति। पञ्चतंत्रमिव एतत् अद्भुतसाहित्यं लोकप्रसिद्धेन सह विश्वप्रसिद्धमस्ति।

वस्ततस्तु अस्माकं देशे जनमानसेषु व्याप्तलोककथासाहित्येषु बेतालपञ्चविंशतिका इति साहित्यं सर्वं प्रियं लोकसाहित्यमस्ति। अस्य कथासाहित्यस्य स्रोतस्साहित्यं गुणाढ्येन विरचितं बृहत्कथासाहित्यं कथयितुं शक्यते। यतो हि बृहत्कथाया: भाषा प्राकृतभाषा वर्तते, तस्यैव रूपान्तरणं संस्कृतेन कश्मीरदेशस्थ महाकविना सोमदेव-भट्ट-रावमहोदयेन संस्कृतभाषायां विलिखितं तथा च अस्य नामकरणं कथासरित्सागर: इति प्रदत्तम्। प्रायश: बृहत्कथाया: सर्वाषां कथानां स्थानं साहित्येऽस्मिन् कथासरित्सागरे अस्ति। अस्यैव कथासरित्सागरस्यैव भागविशेष: बेतालपञ्चविंशतिका कथासाहित्यमस्ति। साहित्येस्मिन् न केवल रोचका: कथा: एव संयोजिता: सन्ति, अपितु कथासु गूढार्थ: अपि अन्ते प्रक्षिप्ता: सन्ति। किं सत्यं? किम् असत्यं? क: धर्म:? क: अधर्म:? इत्यादीनां विषयाणां सम्यक्ज्ञानम् एतासां कथानां माध्यमेन प्राप्तुं शक्यते, येन प्रशासका: राजाविक्रमिव न्यायप्रिय: भवेयु:। कथासाहित्येऽस्मिन् उल्लिखिता: कथा: न्याय-राजनीति-विषमदशासु च सम्यङ्निर्णयस्य क्षमतां संवर्धयति।

**सिंहासनद्वात्रिंशिका-** एतत् कथासाहित्यं द्वात्रिंशत्पुत्तलिका तथा च विक्रमचरितनाम्नापि कथ्यते। कथासाहित्येऽस्मिन् एकदा राजा भोज: भूमौ स्थापितं राज्ञ: विक्रमादित्यस्य सिंहासनं प्राप्नोति। तस्मिन् खलु सिंहासने द्वात्रिंशत्पुत्तलिका: संयोजिता: आसन्। सम्यग्रूपेण तस्य आसनस्य परिमार्जानन्तरं राजा यदा तस्मिन् आसने उपवेशनाय उदीप्त: अभवत्, तदा पुत्तलिका तं उपवेशनाय अवरोधं कृतवत्य:। तथा च ता: क्रमश: तं कथा: श्रावितवत्य:। वस्तुतस्तु तं सिंहासनं महता श्रमेण राजा विक्रमादित्य: प्राप्तवान्। लोकेषु एका प्रसिद्धा कथा विख्याता अस्ति यत् एक: सामान्य: गौर्वाहीक: (चरवाहा) स्व न्यायप्रियतायै विख्यात: अस्ति। परञ्च स: अपाठी निरक्षरश्च अस्ति। वंशानुगतेन स: गौर्वाहीक: राज्यस्य कुम्भकाराणां गवादीनां पालनं पोषणं च करोति

स्म। राजा विक्रमादित्य: तस्य अन्वेषणं कृतवान्, तदा अवगतवान् यत् एकस्या: मृत्तिकाया: प्रपाते आरुढो भूत्वा उपविश्य सर्वं न्यायं करोति स्म। इमां कथां श्रुत्वा राज्ञ: विक्रमादित्यस्य जिज्ञासा पूर्वापेक्षया इतोऽपि दृढतरा अभवत्। तदा राजा निश्चयं कृतवान् यत् नूनमेव अवगमिष्यामि यत् एतादृशं न्यायं स: गौर्वाहीक: केन प्रकारेण करोति। तदा तेन स: राज्ञ: मेलनं भवति। स: गौर्वाहीक: स्वन्यायस्य शक्तिं विषये राज्ञ: सम्मुखे कथयति यत् एकमृत्तिकाया: प्रपाते यदा उपविशामि तदा काचिद् विशिष्टा शक्ति: मम अन्त:करणे भवति। तथ्यमिदं श्रुत्वा राज्ञ: तस्य प्रपातस्य उत्खननं कारितवान्, तस्मिन् खलु उत्खनने राजा एकं राजसिंहासनं प्राप्तवान्। तत् सिंहासनं विभिन्नै: अमूल्यै: रत्नै: रञ्जितम् आसीत्। तथा च तस्मिन् सिंहासने द्वात्रिंशतिपुत्तलिका: आसन्। उपवेशनक्रमे सर्वा: पुत्तलिका: राज्ञ: उपहासं कुर्वन्ति तथा च कथयति यत् एतत् सिंहासनं विक्रमादित्यस्य अस्ति। सिहासनेऽस्मिन् य: उपवेशनं करिष्यति स: नूनमेव तत्सदृश: एव योग्य:, विवेकशील:, दानवीर:, पराक्रमी, न्यायप्रियश्च भवेत्। एतत् श्रुत्वा राजा तस्मिन् आसने उपविशति तथा च सर्वा: पुत्तलिका: एकां एकां कथां श्रावयन्ति। यदा द्वात्रिंशत्कथा: समाप्ता: अभवन् तदा सर्वा: पुत्तलिका: विलुप्ता: अभवन्। यतोहि ता: सर्वा: आत्मान: आसन्। एताभि: कथाभि: राज्ञ: सत्य-न्याय-पराक्रमोदारतादीनां शिक्षां संप्राप्तवान्। प्रत्येक-कथासु राज्ञ: भोजस्य उल्लेखेन अभिज्ञायते यत् एषा रचना एकादशशताब्द्या: अस्ति। अस्य संस्करणत्रयं गद्यात्मकं, पद्यात्मकं, गद्यपद्यमिश्रितं च उत्तरभारते प्राप्यते। तथा च दक्षिणभारते एतत् कथासाहित्यं विक्रमार्कचरितम् इति नाम्ना प्रसिद्धम् अस्ति। कथायां या: द्वात्रिंशत्पुत्तलिका: राजानं कथां श्रावितवत्य: तासां नामानि निम्नलिखितानि भवन्ति। तद्यथा- रत्नमंजरी-चित्रलेखा-चन्द्रकला-कामकंदला-लीलावती-रविभामा-कौमुदी-पुष्पवती-मधुमालती-प्रभावती-त्रिलोचना-पद्मावती-कीर्तिमती -सुनयना-सुन्दरवती-सत्यवती-विद्यावती-तारावती-रुपरेखा-ज्ञानवती-चन्द्रज्योति-अनुरोधवती-धर्मवती-करुणावती-त्रिनेत्री-मृगनयनी-मलयवती-वैदेही-मानवती-जयलक्ष्मी-कौशल्या-रानी रुपवती।

**शुकसप्तति**: - एतत् कथासंग्रहसाहित्यं मूलत: संस्कृतभाषायां कविना चिन्तामणिभट्टेन द्वादशशताब्द्यां विरचितम्। प्रायश: अस्मिन् कथासाहित्ये सप्तति: कथा: सन्ति। सर्वा: कथा: स्वगृहस्वामिनीं प्रति शुकेन उक्ता: कथा: सन्ति। वस्तुतस्तु तस्य शुकस्य गृहस्वामी यदा अन्ताराष्ट्रं प्राप्तवान् तदा तस्य भार्या विरहजन्यपीडया पीडिता मा भवतु एतदर्थं प्रतिरात्रम् एकां कथां तां श्रावयति स्म। अनया कथया प्राप्तज्ञानेन अन्येभ्य: परपुरुषेभ्य: स्वस्य रक्षणं सा करोति स्म। वस्तुतस्तु गृहस्वामी इत्यस्य नाम हरदत्त: भवति। स: एक: व्यापारी अस्ति। तस्य एक: मूर्खपुत्र: यस्य नाम मदनसेन: अस्ति। तस्य भार्या, या कथायां गृहस्वामिनी भवति। तस्या नाम प्रभावती भवति। शुकेन या: सप्तति: कथा: स्वामिनीं प्रति कथिता:, ता: सर्वा: कथा: नारीणां विश्वासघातस्य तथा च गणिकानां धूर्तव्यवहारस्य आख्यानमस्ति। अर्थात् पाठका: श्रोतार: सहृदयाश्च अनर्गलेषु कार्येषु संलग्ना: न भवेयु: एतदर्थं सर्वासु कथासु सामाजिक-सांस्कृतिक-सांवेगिकादीनां नियंत्रणस्य बहूनि तथ्यानि प्रक्षिप्तानि सन्ति। वस्तुत: अन्ताराष्ट्रियभाषासु अपि तत्र फारसी-तुर्की-उर्दू-आङ्गलादिषु भाषासु अपि अस्य कथासाहित्यस्य रूपान्तरणम् अभवत्। यथा तूतीनामा, अलिफलैला इत्यादीनि साहित्यानि अस्यैव रूपान्तरणमस्ति। इदम् एतदपि कथासाहित्यं गद्य-पद्ययो: समन्वितमस्ति, तथापि साहित्येऽस्मिन् गद्यभागस्य आधिक्यं सर्वासु कथासु द्रष्टुं शक्यते। अस्य कथासाहित्यस्य भाषा सरलतरा प्रायश: संधिरहिता वा अल्पसंधियुक्ता अस्ति। कानिचन् पदानि अपाणिनीयानि सन्ति तद्यथा- **"सेवन्तु, सहामि, पतिना, पतौ आदयश्च"**।[7]

संक्षेपरूपेण वयं वक्तुं शक्नुमः यद्भारतीयज्ञानपरम्परायां कथासाहित्यस्य उद्भवः विकासश्च संस्कृतसाहित्यादेव अभवत्। संस्कृतसाहित्ये अद्भुतकथासाहित्यं तु अत्यन्तं लोकप्रियं नैतिकमूल्यवर्धकम्, व्यवहारप्रदम्, हितोपदेशकञ्च वर्तते। संस्कृतगद्यसाहित्ये अद्भुतकथायाः वैशिष्ट्यं सर्वे मुक्तकण्ठेन स्वीकुर्वन्ति।

**सन्दर्भग्रन्थाः**

1. महाकविदण्डिना काव्यादर्शे
2. आचार्यदण्डी, काव्यादर्शे
3. अथर्ववेदे
4. आचार्य विश्वनाथ, साहित्यदर्पणे
5. आचार्य विश्वनाथ, साहित्यदर्पणे
6. अमरकोशे
7.संक्षेप शुकसप्ततिः, डॉ. विश्वासः, पुस्तकस्य प्रस्तावनायां।